# Shrimad Ardhanarishvara Ashtottarashata Namavalih

# શ્રીમદર્ધનારીશ્વરાષ્ટોત્તરશતનામાવલિઃ

## Document Information

Text title : Shrimad Ardhanarishvara Ashtottarashata Namavalih

File name : ardhanArIshvarAShTottarashatanAmAvaliH.itx

Category : shiva, devii, aShTottarashatanAmAvalI, nAmAvalI, devI

Location : doc_shiva

Proofread by : Aruna Narayanan

Latest update : December 25, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2023

*sanskritdocuments.org*

# શ્રીમદર્ધનારીશ્વરાષ્ટોત્તરશતનામાવલિઃ

॥ શ્રીઃ ॥

મહાકૈલાસશિખરનિલયાય નમો નમઃ ।
સમસ્તહૃદયામ્ભોજનિલયાયૈ નમો નમઃ ॥ ૧॥

અપ્રાકૃતમહાદેવીપુરઃસ્થાય નમો નમઃ ।
પુનરાવૃત્તિરહિતપુરઃસ્થાયૈ નમો નમઃ ॥ ૨
અનન્તાનન્દબોધામ્બુનિધિસ્થાય નમો નમઃ ।
રજતાચલશૃઙ્ગાગ્રગૃહસ્થાયૈ નમો નમઃ ॥ ૩॥

હિમાચલેન્દ્રતનયાવલ્લભાય નમો નમઃ ।
શશાઙ્કશેખરપ્રાણવલ્લભાયૈ નમો નમઃ ॥ ૪॥

વામભાગકલત્રાર્ધશરીરાય નમો નમઃ ।
શઙ્કરાર્ધાઙ્ગસૌન્દર્યશરીરિણ્યૈ નમો નમઃ ॥ ૫॥

વિલસદ્દિવ્યકર્પૂરગૌરાઙ્ગાય નમો નમઃ ।
ચિદગ્નિકુણ્ડસમ્ભૂતસુદેહાયૈ નમો નમઃ ॥ ૬॥

અખણ્ડસચ્ચિદાનન્દવિગ્રહાય નમો નમઃ ।
લસન્મરકતસ્વચ્છ વિગ્રહાયૈ નમો નમઃ ॥ ૭॥

ષોડશાબ્દવયોયુક્તદિવ્યાઙ્ગાય નમો નમઃ ।
સહસ્રરતિસૌન્દર્યશરીરિણ્યૈ નમો નમઃ ॥ ૮॥

કોટિકન્દર્પસદૃશલાવણ્યાય નમો નમઃ ।
મહાતિશયસર્વાઙ્ગલાવણ્યાયૈ નમો નમઃ ॥ ૯॥

રત્નમૌક્તિકવૈડૂર્યકિરીટાય નમો નમઃ
વજ્રમાણિક્યકનકકિરીટિન્યૈ નમો નમઃ ॥ ૧૦॥

મન્દાકિનીજલોપેતમૂર્ધજાય નમો નમઃ ।

ભસ્મરેખાઙ્કિતલસન્મસ્તકાયૈ નમો નમઃ ॥ ૧૧॥

ચારુશીતાંશુશકલશેખરાય નમો નમઃ ।
શશાઙ્કખણ્ડસંયુક્તમકુટાયૈ નમો નમઃ ॥ ૧૯॥

ત્રિપુણ્ડ્રવિલસત્ફાલફલકાય નમો નમઃ ।
કસ્તૂરીતિલકોદ્ભાસિનિટિલાયૈ નમો નમઃ ॥ ૧૩॥

સોમપાવકમાર્તણ્ડલોચનાય નમો નમઃ ।
પ્રફુલ્લામ્ભોરુહદલલોચનાયૈ નમો નમઃ ॥ ૧૪॥

નાસાગ્રન્યસ્તનિટિલલોચનાય નમો નમઃ ।
ભક્તરક્ષણદાક્ષિણ્યકટાક્ષાયૈ નમો નમઃ ॥ ૧૫॥

વાસુકિતક્ષકલસત્કુણ્ડલાય નમો નમઃ
લસત્કાઞ્ચનતાટઙ્કયુગલાયૈ નમો નમઃ ॥ ૧૬॥

ચારુપ્રસન્નસુસ્મેરવદનાય નમો નમઃ ।
તામ્બૂલપૂરિતસ્મેરવદનાયૈ નમો નમઃ ॥ ૧૭॥

હિરણ્યજ્યોતિર્વિભ્રાજત્સુપ્રભાય નમો નમઃ ।
મણિદર્પણસઙ્કાશકપોલાયૈ નમો નમઃ ॥ ૧૮॥

સમુદ્રોદ્ભૂતગરલકન્ધરાય નમો નમઃ ।
કમ્બુપૂગસમચ્છાયકન્ધરાયૈ નમો નમઃ ॥ ૧૯॥

સૌદામિનીસમચ્છાયસુવસ્ત્રાય નમો નમઃ ।
સુવર્ણકુમ્ભયુગ્માભસુકુચાયૈ નમો નમઃ ॥ ૨૦॥

અનેકરત્નમાણિક્યસુહારાય નમો નમઃ ।
સ્થૂલમુક્તાફલોદારસુહારાયૈ નમો નમઃ ॥ ૨૧॥

મૌક્તિકસ્વર્ણરુદ્રાક્ષમાલિકાય નમો નમઃ ।
પદ્મકૈરવમન્દારમાલિકાયૈ નમો નમઃ ॥ ૨૨॥

પરશ્વધલસદ્દિવ્યકરાબ્જાય નમો નમઃ ।
પદ્મપાશાઙ્કુશલસત્કરાબ્જાયૈ નમો નમઃ ॥ ૨૩॥

વરાભયપ્રદકરયુગલાય નમો નમઃ ।
વરાભીતિપ્રદાનશ્રીહસ્તાબ્જાયૈ નમો નમઃ ॥ ૨૪॥

કુરઙ્ગ વિલસત્પાણિકમલાય નમો નમઃ ।
રમણીયચતુર્બાહુસંયુક્તાયૈ નમો નમઃ ॥ ૨૫॥

નાગયજ્ઞોપવીતોપશોભિતાય નમો નમઃ ।
ગિરીશબદ્ધમાઙ્ગલ્યસૂત્રિકાયૈ નમો નમઃ ॥ ૨૬॥

મત્તમાતઙ્ગસત્કૃત્તિવસનાય નમો નમઃ ।
વિદ્યુત્સન્નિભસૌવર્ણવસનાયૈ નમો નમઃ ॥ ૨૭॥

મહાપઞ્ચાક્ષરી મન્ત્રસ્વરૂપાય નમો નમઃ ।
શ્રીપઞ્ચદશવર્ણૈકસ્વરૂપાયૈ નમો નમઃ ॥ ૨૮॥

શિઞ્જાનમણિમઞ્જીરચરણાય નમો નમઃ ।
સુપદ્મરાગસઙ્કાશચરણાયૈ નમો નમઃ ॥ ૨૯॥

સહસ્રકોટિતપનસઙ્કાશાય નમો નમઃ ।
સહસ્રકોટિસૂર્યેન્દુપ્રકાશાયૈ નમો નમઃ ॥ ૩૦॥

ચક્રાબ્જધ્વજયુક્તાઙ્ઘ્રિસરોજાય નમો નમઃ ।
રાજરાજાર્ચિતપદસરોજાયૈ નમો નમઃ ॥ ૩૧॥

મુરારિનેત્રપૂજ્યાઙ્ઘ્રિપઙ્કજાય નમો નમઃ ।
પારિજાતગુણાધિક્યપદાબ્જાયૈ નમો નમઃ ॥ ૩૨॥

મન્દારમલ્લિકાદામભૂષણાય નમો નમઃ ।
કનકાઙ્ગદકેયૂરભૂષિતાયૈ નમો નમઃ ॥ ૩૩॥

અજ્ઞાનતિમિરધ્વંસભાસ્કરાય નમો નમઃ ।
શ્રીકણ્ઠનેત્રકુમુદચન્દ્રિકાયૈ નમો નમઃ ॥ ૩૪॥

કમલાભારતીન્દ્રાણી સેવિતાય નમો નમઃ ।
શચીમુખ્યામરવધૂસેવિતાયૈ નમો નમઃ ॥ ૩૫॥

અપર્ણાકુચકસ્તૂરીરઞ્જિતાય નમો નમઃ ।
દિવ્યભૂષણસન્દોહરઞ્જિતાયૈ નમો નમઃ ॥ ૩૬॥

ગુહમત્તેભવદનજનકાય નમો નમઃ ।
મત્તેભવક્ત્રષડ્વક્ત્રવત્સલાયૈ નમો નમઃ ॥ ૩૭
ચરાચરસ્થૂલસૂક્ષ્મકલ્પકાય નમો નમઃ
સૃષ્ટિસ્થિતિતિરોધાનસઙ્કલ્પાયૈ નમો નમઃ ॥ ૩૮॥

નિગમાન્તવચોગમ્યવૈભવાય નમો નમઃ ।
દેવર્ષિસ્તૂયમાનાત્મવૈભવાયૈ નમો નમઃ ॥ ૩૯॥

વિમલપ્રણવાકાશમધ્યગાય નમો નમઃ ।
ચક્રરાજમહામન્ત્રમધ્યસ્થાયૈ નમો નમઃ ॥ ૪૦॥

પૃથ્વ્યમ્ભેજોઽનિલાકાશપૂરિતાય નમો નમઃ ।
અવ્યાજકરુણાપૂરપૂરિતાયૈ નમો નમઃ ॥ ૪૧॥

રતિપ્રખ્યાતમાઙ્ગલ્યફલદાય નમો નમઃ ।
પતિવ્રતાઙ્ગનાભીષ્ટફલદાયૈ નમો નમઃ ॥ ૪૨॥

માર્કણ્ડેયમનોભીષ્ટદાયકાય નમો નમઃ ।
એકાતપત્રસામ્રાજ્યદાયિકાયૈ નમો નમઃ ॥ ૪૩॥

કૃતાન્તકમહાદર્પનાશનાય નમો નમઃ ।
કામક્રોધાદિષડ્વર્ગનાશનાયૈ નમો નમઃ ॥ ૪૪॥

બિડૌજોવિધિવૈકુણ્ઠસન્નુતાય નમો નમઃ ।
કલશોદ્ભવદુર્વાસઃસમ્પૂજ્યાયૈ નમો નમઃ ॥ ૪૫॥

કૈવલ્યપરમાનન્દનિયોગાય નમો નમઃ ।
શક્તિહંસવધૂમુખ્યનિયોગાયૈ નમો નમઃ ॥ ૪૬॥

સ્વદ્રોહિદક્ષસવનવિનાશાય નમો નમઃ ।
કલેબરાન્તવિભ્રાન્તિવિનાશિન્યૈ નમો નમઃ ॥ ૪૭॥

દુઃખમન્યુમહામોહભઞ્જનાય નમો નમઃ ।
દુષ્ટભૂતમહાભીતિભઞ્જનાયૈ નમો નમઃ ॥ ૪૮॥

સનકાદિસમાયુક્તદક્ષિણામૂર્તયે નમઃ ।
અનાદ્યન્તસ્વયમ્ભાનદિવ્યમૂર્ત્યૈ નમો નમઃ ॥ ૪૯॥

અશેષદેવતારાધ્યપાદુકાય નમો નમઃ ।
સનકાદિસમારાધ્યપાદુકાયૈ નમો નમઃ ॥ ૫૦॥

અનન્તવેદવેદાન્તસંવેદ્યાય નમો નમઃ ।
સર્વવેદાન્તસંસિદ્ધસુતત્ત્વાયૈ નમો નમઃ ॥ ૫૧॥

નિજપાદામ્બુજાસક્તસુલભાય નમો નમઃ ।
ભક્તરક્ષણદાક્ષિણ્યકટાક્ષાયૈ નમો નમઃ ॥ ૫૨॥

ઉત્પત્તિસ્થિતિસંહારકારણાય નમો નમઃ ।
અભ્રકેશમહોત્સાહકારણાયૈ નમો નમઃ ॥ ૫૩ ॥

નન્દિભૃઙ્ગિમુખાનેકસંસ્તુતાય નમો નમઃ ।
વન્દારુજનસન્દોહવન્દિતાયૈ નમો નમઃ ॥ ૫૪ ॥

અનન્તકોટિબ્રહ્માણ્ડનાયકાય નમો નમઃ ।
લીલાકલ્પિતબ્રહ્માણ્ડમણ્ડલાયૈ નમો નમઃ ॥ ૫૫ ॥

સહસ્રારમહાપદ્મમન્દિરાય નમો નમઃ ।
અનાહતમહાપદ્મમન્દિરાયૈ નમો નમઃ ॥ ૫૬ ॥

અકારાદિક્ષકારાન્તવર્ણજ્ઞાય નમો નમઃ ।
વાણીગાયત્રીસાવિત્રીવર્ણજ્ઞાયૈ નમો નમઃ ॥ ૫૭ ॥

ઘોરાપસ્મારદનુજદમનાય નમો નમઃ ।
મહાપાપૌઘકાન્તારવિભેદિન્યૈ નમો નમઃ ॥ ૫૮ ॥

કૈલાસતુલ્યવૃષભવાહનાય નમો નમઃ ।
કામકોટિમહાભદ્રપીઠસ્થાયૈ નમો નમઃ ॥ ૫૯ ॥

શમ્બરાન્તકલાવણ્યદેહસંહારિણે નમઃ ।
ભણ્ડદૈત્યમહાસેનાશાસનાયૈ નમો નમઃ ॥ ૬૦ ॥

સંસારામયસચ્છેદભેષજાય નમો નમઃ ।
ભૂતેશાલિઙ્ગનોદ્ભૂતપુલકાયૈ નમો નમઃ ॥ ૬૧ ॥

સહસ્રભાનુસઙ્કાશચક્રદાય નમો નમઃ ।
અન્તર્મુખજનાનન્દફલદાયૈ નમો નમઃ ॥ ૬૨ ॥

આદિમધ્યાન્તરહિતદેહસ્થાય નમો નમઃ ।
રત્નચિન્તામણિગૃહમધ્યસ્થાયૈ નમો નમઃ ॥ ૬૩ ॥

અનાહતમહાસૌખ્યપદસ્થાય નમો નમઃ ।
સુધાબ્ધિસ્થમણિદ્વીપમધ્યસ્થાયૈ નમો નમઃ ॥ ૬૪ ॥

જ્યોતિષામુત્તમજ્યોતીરૂપદાય નમો નમઃ ।
નામપારાયણાભીષ્ટફલદાયૈ નમો નમઃ ॥ ૬૫ ॥

નરસિંહમહાદર્પશમનાય નમો નમઃ ।

ચન્દ્રશેખરભક્તાર્તિભઞ્જનાયૈ નમો નમઃ ॥ ૬૬॥

શાશ્વતૈશ્વર્યવિભવસહિતાય નમો નમઃ ।
ત્રિલોચનકૃતોલ્લાસવિભવાયૈ નમો નમઃ ॥ ૬૭॥

નિશ્ચલૌદાર્યસૌભાગ્યપ્રબલાય નમો નમઃ ।
નતસમ્પૂર્ણવિજ્ઞાનસિદ્ધિદાયૈ નમો નમઃ ॥ ૬૮॥

નિજાક્ષિજાગ્નિસન્દગ્ધત્રિપુરાય નમો નમઃ ।
મહિષાસુરદોર્વીર્યનિગ્રહાયૈ નમો નમઃ ॥ ૬૯॥

દારુકાવનમૌનિસ્ત્રીમોહનાય નમો નમઃ ।
સાક્ષાચ્છ્રીદક્ષિણામૂર્તિમનોજ્ઞાયૈ નમો નમઃ ॥ ૭૦॥

પતઞ્જલિવ્યાઘ્રપાદસંસ્તુતાય નમો નમઃ ।
ધાત્રચ્યુતમુખાધીશસેવિતાયૈ નમો નમઃ ॥ ૭૧॥

સકૃત્પ્રપન્નદૌર્ભાગ્યભેદનાય નમો નમઃ ।
ભાવનામાત્રસન્તુષ્ટહૃદયાયૈ નમો નમઃ ॥ ૭૨॥

અચિન્ત્યદિવ્યમહિમારઞ્જિતાય નમો નમઃ ।
હયમેધાગ્રસમ્પૂજ્યમહિમાયૈ નમો નમઃ ॥ ૭૩॥

હિરણ્યકિઙ્કિણીયુક્તકઙ્કણાય નમો નમઃ ।
નવચામ્પેયપુષ્પાભનાસિકાયૈ નમો નમઃ ॥ ૭૪॥

સંસિદ્ધઋગ્યજુર્વેદવાહનાય નમો નમઃ ।
સુપક્કદાડિમીબીજરદનાયૈ નમો નમઃ ॥ ૭૫॥

કેશવબ્રહ્મસઙ્ગ્રામવારકાય નમો નમઃ ।
સમસ્તદેવદનુજપ્રેરકાયૈ નમો નમઃ ॥ ૭૩॥

ચામીકરમહાશૈલકાર્મુકાય નમો નમઃ ।
સુમબાણેક્ષુકોદણ્ડમણ્ડિતાયૈ નમો નમઃ ॥ ૭૭॥

મહાતાણ્ડવચાતુર્યપણ્ડિતાય નમો નમઃ ।
ક્રૂરભણ્ડાસુરચ્છેદનિપુણાયૈ નમો નમઃ ॥ ૭૮॥

બ્રહ્માદિકીટપર્યન્તવ્યાપકાય નમો નમઃ ।
અનઙ્ગજનકાપાઙ્ગવીક્ષણાયૈ નમો નમઃ ॥ ૭૯॥

અનેકકોટિશીતાંશુપ્રકાશાય નમો નમઃ ।
સચામરરમાવાણીવીજિતાયૈ નમો નમઃ ॥ ૮૦॥

અવિદ્યોપાધિરહિતનિર્ગુણાય નમો નમઃ ।
સર્વોપાધિવિનિર્મુક્તચૈતન્યાયૈ નમો નમઃ ॥ ૮૧॥

શિક્ષિતાન્તકદૈતેયવિક્રમાય નમો નમઃ ।
રક્તાક્ષરક્તજિહ્વાદિશિક્ષિકાયૈ નમો નમઃ ॥ ૮૨॥

અદ્વયાનન્દવિજ્ઞાનસુખદાય નમો નમઃ ।
વૃષભધ્વજવિજ્ઞાતતપઃસિદ્ધ્યૈ નમો નમઃ ॥ ૮૩॥

અનેકકોટિશીતાંશુશીતલાય નમો નમઃ ।
દક્ષપ્રજાપતિસુતાવેષાઢ્યાયૈ નમો નમઃ ॥ ૮૪॥

સમસ્તલોકગીર્વાણશરણ્યાય નમો નમઃ ।
અમૃતાદિમહાશક્તિસંવૃતાયૈ નમો નમઃ ॥ ૮૫॥

શબ્દસ્પર્શસુગન્ધાદિસાધનાય નમો નમઃ ।
જાગ્રત્સ્વપ્નસુષુપ્તીનાં સાક્ષિભૂત્યૈ નમો નમઃ ॥ ૮૬॥

ધર્માર્થકામમોક્ષૈકસૂચકાય નમો નમઃ ।
હિમાચલમહાવંશપાવનાયૈ નમો નમઃ ॥ ૮૭॥

સર્વમન્ત્રમહાચક્રસ્યન્દનાય નમો નમઃ ।
મહાપદ્માટવીમધ્યનિવાસિન્યૈ નમો નમઃ ॥ ૮૮॥

રજસ્તમઃસત્ત્વમુખગુણેશાય નમો નમઃ ।
ચણ્ડમુણ્ડનિહન્ત્રાદિસેવિતાયૈ નમો નમઃ ॥ ૮૯॥

પરાનન્દસ્વરૂપાર્થબોધકાય નમો નમઃ ।
જ્ઞાનશક્તિક્રિયાશક્તિનિયુક્તાયૈ નમો નમઃ ॥ ૯૦॥

જલન્ધરાસુરશિરચ્છેદનાય નમો નમઃ ।
દક્ષાધ્વરવિનિર્ભિન્નશાસનાયૈ નમો નમઃ ॥ ૯૧॥

ચણ્ડેશદોષવિચ્છેદપ્રવીણાય નમો નમઃ ।
મહેશયુક્તનટનતત્પરાયૈ નમો નમઃ ॥ ૯૨॥

મહાપાતકતૂલૌઘપાવકાય નમો નમઃ ।
અશેષદુષ્ટદનુજસૂદનાયૈ નમો નમઃ ॥ ૯૩॥

સુધાકરસિતચ્છત્રરથાઙ્ગાય નમો નમઃ ।
સૌભાગ્યજ્ઞાતશૃઙ્ગારમધ્યમાયૈ નમો નમઃ ॥ ૯૪॥

સરસીરુહસઞ્જાતપ્રાપ્તસારથયે નમઃ ।
બૃહન્નિતમ્બવિલસજ્જઘનાયૈ નમો નમઃ ॥ ૯૫॥

વૈકુણ્ઠનાથજ્વલનસાયકાય નમો નમઃ ।
શ્રીનાથસોદરીરૂપશોભિતાયૈ નમો નમઃ ॥ ૯૬॥

સપ્તકોટિમહામન્ત્રપૂરિતાય નમો નમઃ ।
લોપામુદ્રાર્ચિતશ્રીમચ્ચરણાયૈ નમો નમઃ ॥ ૯૭॥

સહજાનન્દસન્દોહસંયુક્તાય નમો નમઃ ।
વિરક્તિભક્તિવિજ્ઞાનનિધાનાયૈ નમો નમઃ ॥ ૯૮॥

ષટ્ત્રિંશત્તત્ત્વપ્રાસાદભુવનાય નમો નમઃ ।
સહસ્રારસરોજાતનિવાસાયૈ નમો નમઃ ॥ ૯૯॥

અક્ષરક્ષરકૂટસ્થપરમાય નમો નમઃ ।
રમાભૂમીસમારાધ્યપાદુકાયૈ નમો નમઃ ॥ ૧૦૦॥

દેવકીસુતકૌન્તેયવરદાય નમો નમઃ ।
જન્મમૃત્યુજરાવ્યાધિવર્જિતાયૈ નમો નમઃ ॥ ૧૦૧
ભુજઙ્ગરાજવિલસચ્છિઞ્જિન્યાકૃતયે નમઃ ।
નિજભક્તમુખામ્ભોજસંસ્થિતાયૈ નમો નમઃ ॥ ૧૦૨॥

કોલાહલમહોદારશરભાય નમો નમઃ ।
શ્રીષોડશાક્ષરી મન્ત્રમધ્યસ્થાયૈ નમો નમઃ ॥ ૧૦૩॥

જ્વલજ્જ્વાલાવલીભીમવિષઘ્નાય નમો નમઃ ।
હાનિવૃદ્ધિસમાધિક્યરહિતાયૈ નમો નમઃ ॥ ૧૦૪॥

દ્રુહિણામ્ભોજનયનદુર્લભાય નમો નમઃ ।
મત્તહંસવધૂમન્દગમનાયૈ નમો નમઃ ॥ ૧૦૫॥

પ્રપઞ્ચનાશકલ્પાન્તભૈરવાય નમો નમઃ ।
નિત્યયૌવનમાઙ્ગલ્યમઙ્ગલાયૈ નમો નમઃ ॥ ૧૦૬॥

હિરણ્યગર્ભોત્તમાઙ્ગકર્તનાય નમો નમઃ ।

નાગાદ્રિ નિલયેશાનકુટુમ્બિન્યૈ નમો નમઃ ॥ ૧૦૭॥

વસુન્ધરા મહાભાગ્યસૂચકાય નમો નમઃ ।
અર્ધાદ્રિશિખરસ્થાર્ધનારીશ્વર્યૈ નમો નમઃ ॥ ૧૦૮॥

પરાશક્તિસમાયુક્તપરેશાય નમો નમઃ ।
મહાદેવસમાયુક્તમહાદેવ્યૈ નમો નમઃ ॥ ૧૦૯॥

ઇતિ શ્રીમદર્ધનારીશ્વરાષ્ટોત્તરશતનામાવલિઃ સમ્પૂર્ણા ॥

Proofread by Aruna Narayanan

*Shrimad Ardhanarishvara Ashtottarashata Namavalih*
pdf was typeset on December 25, 2023

Please send corrections to *sanskrit@cheerful.com*